# २८ अष्टाविंश दशकः - शक्त्यवमानदोषः

हालाहलाख्या नसुरान् पुरा तु निजघ्नतु र्विष्णु हरौ रणान्ते ।
स्वेनैव वीर्येण जयोऽयमेवं तौ मोहितौ दर्प मवापतुश्च ॥ २८-१॥

ततो विधिस्तौ तरुव द्विचेष्टौ तेजो विहीना वभिवीक्ष्य भीतः ।
निमीलिताक्षः सकलं विचिन्त्य जानन् सुतान् दक्षमुखा नुवाच ॥ २८-२॥

पुत्रा हरिं पश्यत धूर्जटिं च यौ नष्टशक्ती खलु शक्ति कोपात् ।
ततो जगद्भारयुतोऽस्मि यूयं शक्तिं तपोभिः कुरुत प्रसन्नाम् ॥ २८-३॥

शक्तेः प्रसादेन हि पूर्ववत्तौ स्यातां यशोवृद्धि रनेन वः स्यात् ।
शक्तिश्च यत्रा वतरत्यमोघं एतत्कुलं याति कृतार्थतां च ॥ २८-४॥

शक्तेः कटाक्षै र्जगतोऽस्तु भद्रं एवं निशम्याशु हिमाद्रि मेत्य ।
दक्षादयो ध्यान जपादिभिस्त्वां आराध्य भक्त्याऽब्द शतानि निन्युः ॥ २८-५॥

दृष्टा पुरस्तैस्तु नुता त्वमात्थ भीत्यालमार्त्या च हितं ददामि ।
गौरी च लक्ष्मीश्च ममैव शक्ती ते शम्भवे प्राग् हरये च दत्ते ॥ २८-६॥

तौ शक्ति साहाय्यत एव दैत्यान् निजघ्नतुः सत्यमिदं तु ताभ्याम् ।
हा विस्मृतं शक्त्यवमान दोषात् विनष्ट शक्ती खलु तावभूताम् ॥ २८-७॥

तौ पूर्ववत्स्ता मिह शक्ति रेका जायेत दक्षस्य कुले मदीया ।
क्षीराब्धितोऽन्या च पुरारिराद्यां गृह्णातु पश्चा दितरां च विष्णुः ॥ २८-८॥

सर्वे स्वशक्तिं परिपूज्य माया-बीजादि मन्त्रान्विधिव ज्जपन्तः ।
विराट्स्वरूपं मम रूपमेतत् सच्चित्स्वरूपं च सदा स्मरेत ॥ २८-९॥

प्रयात तुष्टा जगतां शुभं स्यात् एवं त्वमाभाष्य तिरोदधाथ ।
कारुण्यतस्ते गिरिशो हरिश्च शक्तावभूतां निजकर्म कर्तुम् ॥ २८-१०॥

मातः कटाक्षा मयी ते पतन्तु मा माऽस्तु मे शक्त्यवमान पापम् ।
सर्वान्स्वधर्मान् करवाण्यभीतो भद्रं मम स्यात्सततं नमस्ते ॥ २८-११॥